
# 13 बहूनि क्रीडनकानि



**चित्रं दृष्ट्वा विभिन्नक्रीडनकानां संख्याम् अन्वेषयन्तु।**






गजाः  ☐ टेडि भल्लूकाः  ☐

कारयानानि  ☐ पांचालिकाः  ☐

**अधिका/ न्यूना/ समाना वा प्रयुज्य निम्नलिखितवाक्यानि पूरयन्तु।**

क. पांचालिकानां  संख्या कारयानानाम्  संख्यातः ______ अस्ति।

ख. गजानां  संख्या पांचालिकानां  संख्यातः ______ भवति।

ग. टेडिभल्लूकानां  संख्या गजानां  संख्यातः ______ भवति।

घ. कारयानानां  संख्या टेडिभल्लूकानां  संख्यातः ______ अस्ति।

## विविध-वर्णमयानि पुष्पाणि

भवन्तः प्रायः उद्याने पुष्पाणां यत् वर्णं पश्यन्ति, तस्य वर्णस्य नाम वदन्तु।

### विविध-वर्णमयानां पुष्पाणां चित्रं दृष्ट्वा पुष्पाणां सङ्ख्यां लिखन्तु -



| | | | |
|---|---|---|---|
| नीलपुष्पाणि | ☐ | नारङ्गपुष्पाणि | ☐ |
| रक्तपुष्पाणि | ☐ | धूम्रवर्ण-पुष्पाणि | ☐ |

क. येषां पुष्पाणां संख्या न्यूनतमा अस्ति तेषां वर्णं वदन्तु।

________________

क. येषां पुष्पाणां संख्या अधिकतमा अस्ति तेषां वर्णं वदन्तु।

_____________________

### सत्यम् असत्यं वा

क. नीलपुष्पाणाम् अपेक्षया रक्तपुष्पाणां सङ्ख्या अधिका अस्ति। ☐

क. नारंगपुष्पाणाम् अपेक्षया धूम्रवर्ण-पुष्पाणां सङ्ख्या अधिका अस्ति। ☐



## परियोजना-कार्यम्

क. पत्रकम् एकं निर्मान्तु। पत्रकस्य सीमासु विविधवर्णमयानि पुष्पाणि स्थापयन्तु।


ख. भवतः कक्षायां मित्राणि सन्ति किल! तर्हि कति बालकानां नाम्नि 3 अक्षराणि सन्ति, कति बालकानां नाम्नि 4 अक्षराणि सन्ति तथा च कति बालकानां नाम्नि 4 तः अधिकानि अक्षराणि सन्ति इति जानन्तु।

© NCERT not to be republished

# प्रहेलिकाः




क. कोपलः इति बालकः अधोदत्ते चित्रे संख्यापत्रकाणि स्थापितवान्। परम् अनाया इति बालिका अधोदर्शितरीत्या पात्रैः तानि सङ्ख्यापत्रकानि गोपितवती। किं भवन्तः ताः संख्याः काः इति ज्ञातुं शक्नुवन्ति वा?




भवन्तः अपि स्वहस्तयोः उपयोगेन संख्यापत्रकस्थ-सङ्ख्याः गोपयित्वा मित्रैः सह एवं प्रकारेण क्रीडितुं शक्नुवन्ति।

ख. काष्ठानां संख्यां गणयन्तु। 3 काष्ठानि सन्ति वा? 4 काष्ठानि?




ग. ज़रीना चषकान् एवं प्रकारेण स्थापयति। एनं क्रमम् अग्रे वर्धयितुं तस्याः साहाय्यं भवन्तः कुर्वन्तु।



________________ ________________


© NCERT not to be republished

घ. तः 10 पर्यन्तं सङ्ख्याः अन्विषन्तु।

| | | | | | | |
|---|---|---|---|---|---|---|
| द | श | द् | वौ | फ | ल | न |
| क | र | ज | ढ़ | स | प्त | भ |
| ल | ग | ए | कः | क्ष | स | च |
| फ | प | क | ष | ड् | ण | त्वा |
| ओ | ञ्च | ड | श | न | व | रः |
| प | ह | अ | ष्ट | व | त्र | यः |



ङ. दत्तेषु कन्दुकेषु 1 तः 5 पर्यन्तं सङ्ख्याः लिखन्तु, येन उभयतः अपि योगः समानः भवेत् ।




च. गिल्लु नामकस्य बालकस्य प्रिया सङ्ख्या 8 (अष्ट)। यदि पृष्टस्य प्रश्नस्य उत्तरं 8 भवति, तर्हि सः प्रसन्नः भवति, नोचेत् दुःखी।

अतः, गिल्लु बालकं कांश्चन एतादृशान् प्रश्नाना पृच्छन्तु येषाम् उत्तरं केवलं 8 स्यात्।

© NCERT not to be republished


छ. अधोदत्तपेटिकासु △, □ ,○ इति आकृतीः तथा पूरयन्तु यथा कापि आकृतिः पङ्क्तौ (क्षैतिजे), स्तम्भे (ऊर्ध्वाधरे) च ए+D864कवारमेव स्यात्।









ज. 4 विभिन्नानि (पृथग्विधानि) वस्तूनि स्वीकुर्वन्तु (प्रत्येकं वस्तु 4 भवेत्), यथा 4 कुड्मलाः, 4 पाषाणखण्डाः, 4 बीजानि, 4 मृत्तिकाकन्दुकाः इत्यादयः । अधुना तानि पृथग्विधानि वस्तूनि अधोदत्तपेटिकासु तथा स्थापयन्तु यथा प्रत्येकं वस्तु पङ्क्तौ स्तम्भे च एकवारम् एव आगच्छेत्।






किं भवन्तः एतानि 4 विभिन्नानि (पृथग्विधानि) वस्तूनि अन्येन मार्गेण पूरयितुं शक्नुवन्ति ?

झ. अहं कः? (अहं कः इति ज्ञातुं दर्पणः भवतः साहाय्यं कर्तुं शक्नोति।)





J. अहं कः?

i. अहं 5 तथा 10 इत्यनयोः मध्ये अस्मि। यदि मां विपरीतरूपेण स्थापयन्ति चेत् अहं अन्यां संख्यां भवामि, यत्र त्रयः अङ्काः अधिकाः भवन्ति ।

ii. अहं 8 तः 3 अधिका परं 14 तः 3 न्यूना अस्मि।

iii. अहं 50 तः परं, 54 तः पूर्वं च अस्मि। मयि स्थितयोः द्वयोः अङ्कयोः योगः 7 भवति।


iv. अहं 40 तः पूर्वतना संख्या अस्मि।

v. यदि मयि 5 योजयन्ति चेत् तर्हि भवन्तः 24 प्राप्स्यन्ति।

vi. अहं 35 तः अनन्तरसंख्या अस्मि।

vii. यदि मत्तः 8 न्यूनीकुर्वन्ति चेत् तर्हि 14 संख्या अवशिष्टा भविष्यति।

ट. षट् अग्निशलाकाः प्रयुज्य शून्यं ( 0 ) निर्मितम्। अत्र एकस्याः अग्निशलाकायाः स्थानपरिवर्तनेन कामपि अन्यां संख्यां प्राप्तुं शक्नुवन्ति वा?



ठ. लुप्तं खण्डम् अन्विष्य घटस्य आकृतिं सम्पूर्णं कुर्वन्तु।



© NCERT not to be republished

ड. 25 तः कतिवारं 5 व्यवकलयितुं शक्यते ?

ढ. रानु इति बालिकायाः सविधे 3 बीजानि सन्ति। सा अधोदत्ते चित्रे कासुचित् अपि 3 सङ्ख्यासु तानि बीजानि स्थापयितुम् इच्छति, येन तासां सङ्ख्यानां योगः 17 भवेत्। किं भवन्तः अस्मिन् कार्ये तस्याः साहाय्यं कर्तुं शक्नुवन्ति?


| | | | |
|---|---|---|---|
| 4 | 9 | 6 | 7 |
| 16 | 0 | 8 | 5 |
| 15 | 13 | 1 | 2 |
| 17 | 10 | 3 | 12 |

भवन्तः एतत् कार्यं कतिभिः प्रकारैः कृतवन्तः?

यदि भवतः सविधे 2 बीजे स्तः, तर्हि 17 संख्यां प्राप्तुं कयोः द्वयोः सङ्ख्ययोः उपरि बीजे स्थापयिष्यति?

ण. समुचितायाः छायायाः उपरि वर्तुलं कुर्वन्तु।







© NCERT not to be republished


त. अधोलिखित-पेटिकासु 5 तः 9 पर्यन्तं सङ्ख्याः तथा लिखन्तु यथा पङ्क्तेः स्तम्भस्य च योगः समानः भवेत्।









थ. संयोजनमाध्यमेन व्यवकलनमाध्यमेन वा चित्रस्य मध्ये लिखितां सङ्ख्यां प्राप्तुं प्रयत्नं कुर्वन्तु।




द. प्रदत्ते स्थाने समुचित-संख्याः लिखन्तु ।








© NCERT not to be republished


ध. सरितायाः समीपे विभिन्नमूल्ययुताः चतस्रः मुद्राः सन्ति ।



₹ 49 रूप्यकाणां व्ययार्थं न्यूनानिन्यूनं कति मुद्राः अपेक्षिताः?


न. नारङ्गस्य मूल्यम् जानन्तु।  .

 +  = 8

 +  = 10

 =

प. कन्दुकेन क्रीडाम




i. यथा कन्दुकानाम् आहत्य योगः 15 भवेत् तथा 3 कन्दुकानि चिन्वन्तु।

ii. अधिकतमसंख्यां प्राप्तुं 3 कन्दुकानि एव चिन्वन्तु।

iii. न्यूनतमसंख्यां प्राप्तुं 3 कन्दुकानि एव चिन्वन्तु।

## टिप्पण्यः

© NCERT
not to be republished

© NCERT
not to be republished